4825

अनर्घराघवप्रयोगः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ ॥अथाग्निहोत्रहोमप्रारंभः॥ यजमानः अधिदक्षंसूर्यंगार्हपत्यस्यपश्चा
दुर्मेवासीनोदर्भान्धारयमाणःप्राणानायम्यस्वर्गकामःश्रीपरमेश्वरप्रीत्यर्थंसायंप्रातर
ग्निहोत्रंहोष्यामि॥ तत्रेदानीसायमग्निहो पयसाहोष्यामीतिसायं॥ उषसिप्रातरग्निहो
त्रंपयसाहोष्यामीत्येवप्रातः॥ इत्युद्देशोनवाकर्त्तव्यः॥ अध्वर्युरुक्त्वा॥ ततःसायंसंध्योपास
नोत्तरंअस्तोत्तरकालएवनक्षत्रंदृष्ट्वावाघटिकाद्व्यात्मकप्रदोषवासायमग्निहोत्रस्यत्रिवि
धामुख्यःकालः॥ उषसिपुरोदयंउदितेवात्रिविधःप्रातरग्निहोत्रस्यमुख्यःकालः॥ एतक
लाःप्रथमपरिग्रहेणव्यवस्थिताः॥ अस्तमितेउदितेचहोमः॥ यजमानःकाष्ठकलापत्रयं
गृहीत्वा॥ विश्वदानीमापरंतोनातुरेणमनसाग्नेमातेप्रतिवेशारिषाम॥ तीर्थेनविहारम
त्येति॥ यदग्नेयानिकानिचातेदारूणिदध्मसि॥ तदस्तुतुभ्यमिद्धृतंतज्जुषस्वयविष्ठ्यस्वा

राम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हा॥अग्नयइदं॰आहवनीयेस्रुवंकाष्ठमादधाति॥यदस्युपजिह्विकायद्दस्रोऽतिसर्पति॥
सर्वंतदस्रुतेघृतंतज्जुषस्वयविष्यस्वाहा॥अग्नयइदं॰गार्हपत्ये॥रात्रिंरात्रिमप्रयावं
भरंतोश्वायेवतिष्ठेतघासमग्नेमे॥रायस्पोषेणसमिषामदंतोग्नेमातप्रतिवेशारिषाम
स्वाहा॥अग्नयइदं॰दक्षिणाग्नेा॥विद्युदसिविद्यमेपाप्मानंहतंसत्यमुपैमिमयिश्रद्धा
उत्तरेणविहारमपउपस्पृशति॥अपरेणाहवनीयंदक्षिणेनदक्षिणातिक्रम्याहवनीयद
क्षिणतउपविशति॥पत्नीपत्यालोके॥इदंसित्रतंतमदहंनावुभयोर्व्रतंचरिष्यामिदं
व्रतंतमदहंनावुभयोर्व्रतंचरिष्यामिसुरूपंहंनावुभयोर्व्रतंचरिष्यामीडएहिमयिश्रव
स्व॥यदग्निहोत्र्यागोर्घासरूपंव्रतंतदात्मनिसंकल्पतेजपति॥अध्वर्युःपरिसमूहनेना
ग्नीनलंकरोति॥अग्नेगृहपतेशुंधस्व॥गार्हपत्यं॥अग्नेवह्नेशुंधस्व॥दक्षिणाग्निं॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

अग्नेसकाशाद्धुंधस्व॥आहवनीयं॥पुरस्तादलंकाराःसायं॥उपरिष्टादलंकाराःप्रातः॥
उभयत्रोभयतोलंकारावा॥दर्भैरग्नीन्परिस्तीर्यआहवनीयगार्हपत्यदक्षिणाग्नीन्च॥
उत्तरेणगार्हपत्यंदर्भेषुपात्राण्युत्तरसंस्थानिप्रयुनक्ति॥स्रुवमग्निहोत्रहवणीमग्नि
होत्रस्थालीमुपवेषंकृत्वोच॥दक्षिणेनविहारंगोरवस्थितात्तवति॥इडएवादितएहि
सरस्वत्येहिगोरोहि॥गामाहूयति॥यजमानःश्रद्धएहिसत्येनत्वाहूयामि॥आहूयमा
नामनुमंत्रयते॥अध्वर्युः॥पूषासि॥वत्समुपसृजति॥प्राचीमुदीचीवागामादत्सरद्ध
न्योदोग्धि॥तूष्णींस्थाल्यांदोहनंवा॥नदुग्धंसंमृशति॥यजमानःइयमसितस्या
ग्निर्वत्सःसामेस्वर्गंचलोकमुभयंचधुक्ष्व॥दुह्यमानांगामनुमंत्रयते॥अध्व॰दो
हनेदुग्धंचेत्स्थाल्यामानयति॥ऋतंत्वासत्येनपरिषिंचामि॥सायमाहवनीयंपरिषि
ञ्चति॥एवंगार्हपत्यंदक्षिणाग्निं॥सत्यंत्वर्तेनपरिषिंचामीतिप्रातः॥यस्यस्यसंत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिरासियज्ञस्यत्वासंततेयेनयाग्निसंततेयेत्वायज्ञस्य॥ गार्हपत्यात्संततामपांधारांस्रावयत्या
ह्वनीयात्॥ गार्हपत्यस्यपश्चादुपविश्य॥ दृष्टिरसिब्रह्मयच्छ। उपवेषमादाय। निरूढंज
न्यंभयꣳसहतेनयाद्विष्मःसुभूतायभ्रयध्वं॥ गार्हपत्यादुदीचोंगारान्निरूहति॥ तूष्णींव
तान्करोति॥ इडायाःपदंघृतवच्चराचरंजातवेदोह विरिदंजुषस्व॥ येग्राम्याःपशवोविश्व
रूपास्तेषांꣳसप्तानामिहरंतिरस्तुपुष्टिं॥ तेधग्निहोत्रमधिश्रयति॥ उद्ध्वस्रोदरंप्रज
यापशुभिर्मृयासं। आदीप्तेनतृणेनाग्निहोत्रमवेक्षते॥ हरस्तेमाविनैषं॥ स्रुवेणाद्भिःप्र
तिषिंचति॥ गोदोहनसंक्षालनेन वाप्रतिषेकः॥ अंतरितꣳरक्षोंतरिताअरातयः। गार्ह
पत्यस्योल्मुकेनपर्यग्निकरोतित्रिः॥ उल्मुकंनिरस्यापउपस्पृश्य। धूमोसिरायस्पोषव
निरिहोजंयच्छ॥ सुरेतंवत्मकुर्वन्नुदगुद्वासयति॥ प्रजांमेयच्छ। समीपएवधूमोल्लापय
ति। प्रत्यूढंजन्यंभयꣳसहतेनयाद्विष्मःसुभूतमकर्त्ते॥ उपवेषणगार्हपत्येंगारान्प्रस्तरहति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्विस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामादेदे॥मंत्रादस्यासुवमग्निहोत्रहव
र्णीचादाय॥प्रत्युष्टंरक्षःप्रत्युष्टाअरातयः।गार्हपत्येसुवमग्निहोत्रहवर्णीचसहनि
ष्पति॥सुवमग्निहोत्रहवर्णीचसव्येनात्मानंधत्ते। सुपर्णोसिसुपर्णमयीहिरण्य
यष्टिरस्यमृतपालाशाश्चोतोयज्ञानां॥दक्षिणेनहस्तेनाग्निहोत्रहवर्णीसंमार्ष्टि॥अरि
ष्टायजमानःपत्नीच॥सुवाग्निहोत्रहवण्यासहवसंमार्ष्टि॥पुनर्निष्टपनंकेचिदिच्छंति॥
यावदुन्नयनंहस्तएवाग्निहोत्रहवर्णी॥ओमुन्नेष्यामिहव्यंदेवेभ्यःपाप्मनोयजमानं॥
सायंयजमानमामंत्रयते॥ओमुन्नयामिहव्यंदेवेभ्यःपाप्मनोयजमानं॥प्रातः॥यज
मानःहविर्देवानामसिमृत्योर्मापयःस्वस्तिमस्वनयमेअस्तु॥उपांशुजपित्वा॥ओमु
न्नय॥उच्चैःप्रत्याह॥अवसतियजमानेअध्वर्युरोमुन्नयतिस्वयमात्मानंप्रतिगृह्णात्॥
नहविर्देवानामितिजेपः॥उन्नीयमानेयजमानस्तिष्ठति।नचंक्रम्यतेवाचंयछत्याहामात्र॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

उन्नीतउपविशति।स्वयंहोमेतिष्ठन्नेवान्वयति।अध्वर्युःअग्निहोत्रहवण्यांचतुरःपूर्णस्रुवा
नुन्नयति॥अग्नयेचत्वापृथिव्यैचोन्नयामि।प्रथमं॥वायवेचत्वांतरिक्षायचान्नयामि।
द्वितीयं॥सूर्यायचत्वादिवेचान्नयामि॥तृतीयं॥अद्भ्यश्चत्वौषधीभ्यश्चोन्नयामि।च
तुर्थं॥पंचावत्तिनस्तुचतुर्थस्यादत्तिः॥स्रुवंनिधाय।उन्नीतंदक्षाहोत्राभिमृशति।चित्तिः
स्रुक्।चित्तमाज्यं।वाग्वेदिः।आधीतंबर्हिः।केतोअग्निः।विज्ञातमग्निः।वाक्पतिर्होता।म
नउपवक्ता।प्राणोहविः।सामाध्वर्युः॥सुज्ञदेवैःसायंयावभिःसायंयावानोमादेवाःस्वस्ति
संपादयंतुपशुभिःसंपृचीय॥सायंमंत्रादृत्याउन्नीतंस्थालीचाभिमृशति॥सुज्ञदेवैः
प्रातर्यावभिःप्रातर्यावाणोमादेवाःस्वस्तिसंपादयंतुपशुभिःसंपृचीय॥प्रातः॥पशून्मे
यछ॥उन्नयनरेशाएवकृत्वैग्निहोत्रहवणीःसादयति।अपरेणगार्हपत्यंवा।समिधंस्तु
कृदंउपसंगृह्य।उर्वंतरिक्षंवीहि॥गार्हपत्यस्यार्चिःसंनिधायहरत्याह्वनीयात्॥चित्तिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हुक्ष्व॰ स्रामोध्वर्युः। प्राङ्हरंदशहोतारंव्याचष्टे॥ अग्नयेत्वावैश्वानरायमध्यदेशंनिगृह्णाति। वातायत्वाअग्निहोत्रहवणीमुद्यच्छते॥ आयुर्मयज्ञ॰ अपरेणाहवनीयंकूर्चंनिधाय। तस्मिन्नुपसादयति। आहवनीयवायव्यदिश्युपविश्य। एषातेअग्नेसमित्तयावर्द्धस्वचाचप्यायस्व॥ वर्द्धतांचतेयज्ञपतिराचप्यायतांस्वाहा॥ अग्नयइदं॰ विद्युदसि विद्युन्मेपाह्यमृतंसत्यमुपैमिमांयज्ञम्॥ अपउपस्पृश्य॥ होत्राभूर्भुवःसुवर्यज्योतिर्ज्योतिरग्निःस्वाहा॥ अग्नयइदं॰ सायंज्वलत्यांसमिधिमूलाग्रंगुलेऽग्निहोत्रहवण्यास्रुवमात्रांपूर्वामाज्यतिंज्युहोति॥ होत्राभूर्भुवःसुवःसूर्यज्योतिर्ज्योतिःसूर्यःस्वाहा॥ सूर्यायेदं॰ प्रातः॥ वर्चोमयज्ञ॰ पुनरोषधीरुपसादयति॥ ओषधीभ्यस्त्वोषधीर्जिनुतां॥ लुगासेचनगतंलेपंहस्तेनादायकूर्चउत्तरतोनिमार्ष्टि॥ यज॰ ओषधीभ्यइदं॰ अध्वर्युः अग्नेगृहपतेमासासंतांश्रीरात्मन्नमृतमधिप्रजाज्योतिरशीय॥ गार्हपत्यमवेक्षेत॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

प्रजापतयेस्वाहेतिमनसाध्यायन्पूर्वाकृतेरयंगुलमात्रेपूर्वाकृतंह्रस्वसीमुत्तरामाकृतिंजु
होति॥यज॰प्रजापतयइदं॰उत्तरामाकृतिमुपोत्थायकवातियाऽऽहवनीयमुपतिष्ठते॥
स्वयंहोमतुअध्वर्युसंबंधिदृष्यंतेऽपरज्ञानंकेवलाध्वर्युहोमेपि॥ उपप्रयंतोअध्वरंमंत्रं
वोचेमाग्नये॥आरेअस्मेचशृण्वते॥अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः॥पयःसहस्र
सामृषिं॥अग्निमूर्द्धादिवःककुत्पतिःपृथिव्याअयं॥अपांरेतांसिजिन्वति॥अयमिह
त्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः॥यमप्नवानोभृगवोविरुरुचुर्वनेषु
चित्रंविभुवंविशेविशे॥अग्नीषोमाविमंसुमेशृणुतंदृषणाहवं॥प्रतिसूक्तानिहर्यतं
नवंतदाशुषेमयः॥इयंपंचमीऋक्पूर्वपक्षे॥उक्थावांमिंद्राग्नीआहुवध्याउक्थाराधसः
सहमादयध्यै॥उक्थाहातारोविषांरयीणामुक्थावाजस्यसातयेऽवंवां॥इत्यपरपक्षपंच
मी॥अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः॥तंजानन्नग्नआरोहाथानोवर्द्धयारयिं॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रुक्मायत्रषष्ठी॥ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेधानास्तनुवंपुषेम॥ मह्यनमंतांप्रदिशश्चत्वस्त्वयाध्यक्षेणपृतनाजयेम॥ ममदेवाविहवेशृणंतुसर्वेइंहंवंतोमरुतोविष्णुरग्निः॥ममांतरिक्षमुरुगायमस्तुमहिवातःपवतांकामेअस्मिन्॥ मयिदाइविणमायजंतांमय्याशीरस्तुमयिदेवहूतिः॥ दैव्याहोतारावनिषंतपूर्वेरिष्टास्यामतनुवासुवीराः॥ महयजंतुममयानिहव्याकूतिःसत्यामनसोमेअस्तु॥ एनोमानिगांकृतमज्जनाहंविश्वेदेवासाउधिवोचतामे॥ आयुर्ध्यग्नेस्यायुर्मेदेहिवर्चोदाग्नेसिवर्चोमेदेहितनूपाग्नेसितनुवंमेपाह्यग्नेयन्मेतनुवाऊनंतन्मआपृणसित्वावसाखस्तितेपारमशीयसित्वावसाखस्तितेपारमशीय॥ असुकस्कर्मन्वस्तितस्क॥ इतिसर्वेषांपुत्राणांनामानिगृह्णाति द्विर्द्विरेकैकस्य॥ अग्नेःसमिदस्यभिशस्यामापाहि॥ सोमस्यसमिदसिप्रस्तरस्यासएहि॥ यमस्यसमिदसिमृत्योर्मापाहि॥ इंद्रस्यत्वाबाहुभ्यांप्रतिगृह्णामिदक्षिणतः समिधीमहिवयस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तावयस्कृत्यशस्त्वतोयाःस्कृतंस्रुचीरासोअदाभ्यं॥अग्नेसपत्नक्षभनंवाषिष्ठेअधिनाके॥च
लःसमिधआहवनीयआदधाति॥एवमितरयोरितिकेचित्॥वयंसोमव्रतेतवमनस्तनूषु
विभ्रतः॥प्रजावंतोअशीमहि॥सोदकेनहस्तेनमुखंविमृष्टे॥संत्वमग्नेसूर्यस्यवर्चसागथाःस
र्षणीःस्तुतेनसंप्रियेणधाम्ना॥त्वमग्नेसूर्यवर्चाअसिसंमामायुषावर्चसाप्रजयासृज
पुनर्विमृष्टे॥संवर्चयामिप्रजाअहमिडंप्रजनयामानवीः॥सर्वाभवंतुनोगृहे॥मनुष्यानुपतिष्ठ
तेअंतःस्थांनोवाभक्षीयमहस्रंमहो वोभक्षीयसहस्रंसहोवाभक्षीयार्जस्रंवोभक्षीय॥
यशसमुपतिष्ठते॥रेवतीरध्वमस्मिन्लोकेस्मिन्गोष्ठेस्मिन्क्षयेस्मिन्योनौविहवस्तोमापय
तबहुंमेकृताकरत्॥अंतराग्नीतिजपति॥सःहितासिविश्वरूपीरामाजाविशागोपत्येना
रायस्पोषेणसहस्रपोषंवःपुष्यासंमयिवोरायस्त्रयंतां॥गामालभतेवत्सवा॥उपत्वाग्नेदिवेदि
वेदोषावस्तर्धियावयं॥नमोभरंतएमसि॥राजंतमध्वराणांगोपामृतस्यदीदिविं॥वर्द्धमानंस्वे

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

रमे॥ सनः पितेव सूनवेऽग्नेसूपायनो भव॥ सचस्वानः स्वस्तये॥ अग्नेसख्नोअंतमः॥ उत त्राता शिवोभववरूथ्यः॥ तवांशो विशदीदिरः॥ सुम्नायन्नूनमीमहे सखिभ्यः॥ वसुरग्निर्वसुश्रवाः॥ अछानक्षिद्युमत्तमोरयिंदाः॥ षड्गाहपत्यसुपतिष्ठते॥ ऊर्जावः पश्याम्यूर्जोमापत्यंतरायस्पोषेण वः पश्यामिरायस्पोषेणामापश्यतेडांछमधुकृतंस्योनामाविशतेरामदः॥ सहस्रपोषंवसुपुष्यासंमयिदेवारायन्त्रयंतां॥ गोष्ठमुप तिष्ठते॥ शुक्रनमसिसहस्रपोषंपुषिसहस्रपोषस्यै शिषेतस्यास्तेरयिंभक्षीयोहिष्यासम॥ पुनरेवगामालभतेवत्सवा॥ महिश्रीणामवोअस्तुधुक्षंमित्रस्यार्यम्णः॥ दुराधर्षंवरुणस्य॥ नहितेषाममाचनाध्वसुवारणेष्वा॥ ईशेरिपुरघशंसः॥ तेहपुत्रासोअदितेःशर्मयछंत्वजस्रंप्रदाशुषेदातोणि॥ माहित्रेणत्वचेनाहवनीयसुपतिष्ठते॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ सोमानूंस्वरणंकृणुहिब्रह्मणस्पते॥ कक्षीवंतंयऔशिजः॥ योरत्नान्योअमीवहावसुवित्पुष्टिवर्द्धनः॥ स

राम ६

CC-0. Mrugendra Vinod Collection, Gangotri

नः सिषक्तु यस्तुरः ॥ मानः शꣳसो अरुरुषो धूर्तिः प्रणङ्मर्त्यस्य ॥ रक्षाणो ब्रह्मणस्पते । प्रि
यो ब्रह्मणस्पत्याशिराह्वनीयमुपतिष्ठते ॥ कदाचनस्तरीरसि नेन्द्र सश्चसि दाशुषे ॥ उपोपेन्नु
मघवन्भूयइन्नु ते दानं देवस्य पृच्यते ॥ कदाचन प्रयुच्छस्युभे निपासि जन्मनी ॥ तुरीयादित्यस
वनं तृतीयमाति रोचसे मृतं दिवि ॥ परित्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि ॥ धृषद्वर्णं दिवेदिवे
मित्रं कृधि प्रजावतः ॥ परि ते दूळभो रथोऽस्माꣳ अश्नोतु विश्वतः ॥ येन रक्षसि दाशुषः ॥ पयोव्रतो
नऽउपतिष्ठते ॥ पूषामा पशुपाः पातु पूषानापथिपाः पातु पूषामाधिपाः पातु पूषामाधिपतिः
पातु ॥ जपति ॥ अथदिशऽउपतिष्ठते ॥ प्राचीदिगग्निर्देवतायामेतस्यैदिशोभिदासादग्निꣳस
क्रुच्छत्वग्निमेतस्यैदिशोगोपायतु ॥ दक्षिणादिगिंद्रोदेवतायामेतस्यैदिशोभिदासादिंद्रꣳ
सक्रुच्छत्विंद्रमेतस्यैदिशोगोपायतु ॥ प्रतीचीदिग्वरुणोदेवतायामेतस्यैदिशोभिदासात्तान्
वरुणꣳसक्रुच्छतुमरुतोमेतस्यैदिशोगोपायंतु । उदीचीदिग्सोमोदेवतायामेतस्यैदिशो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मित्रादास्तन्मित्रावरुणौसक्रेछतुमित्रावरुणौत्मेतस्यैदिशोगोपायतां॥ऊर्ध्वादिग्बृहस्पतिर्देवता
यातेतस्यैदिशोमित्रादास्माद्बृहस्पतिःसक्रेछतुबृहस्पतिर्मेतस्यैदिशोगोपायतु॥ध्रुवादिग्विष्णु
र्देवतायोमेतस्यैदिशोमित्रादासादस्मिन्सक्रेछत्वस्मिन्मेतस्यैदिशोगोपायतु॥दिशउन
ष्ठाय॥धर्मोमाधर्मिणःपातुविधर्मोमाविधर्मिणःपात्वायुश्चप्रायुश्चचक्षुश्चविचक्षुषश्च
प्राणश्चापानश्चप्रांचावांचाऽगऊरुगोर्कस्यतेवयंवाचासंभरंतंनोगमेमहिछिन्नोदेव्यस्तंतु
मिमनुष्यश्छिद्रिव्याद्वान्नोमाछित्सिमानुषाज्योतिषेतंत्वेताःमुकृशोज्योतिषा
तनु॥पुत्रस्यनामगृह्णीतांतराग्नीतिषंजपति॥अग्नुआयूंषिपवसआसुवोर्जमिषंचन॥
आरेबाधस्वदुछुनां॥अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधत्पोषंरयिंमयि॥अग्ने
गृहपतेसुगृहपतिरहंत्वयागृहपतिनास्यासंसुगृहपतिमयात्वंगृहपतिनास्याः
तेःहिमास्तामाशिषमाशासेमकृशमेज्योतिषती॥सर्वेषांपुत्राणांपुत्रमंगंनामान्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुद्रुत्यज्योतिष्मतीमित्यंततोवदति॥अजातपुत्रः॰माशास्तंतंवेज्योतिष्मतीं॥इत्यजात
पुत्रोब्रूयात्॥इदंसर्वमुपस्थानंसायंसायं॥प्रातस्तु॥भूर्भुवःसुवःसुप्रजाःप्रजया
सूयासंसुवीरोवीरैःसुवर्चावर्चसासुपोषःपोषैः॥जनानांवैकल्पिकानांमध्ये
केनवा॥अध्वर्युःस्रुग्गतंपक्षमहदभिवीक्षेत॥इडेत्वा॥सायंसुचमवमार्ष्टि॥ऊर्जे
त्वा॥प्रातरुन्मार्ष्टि॥रुद्रमुखानांमेवमुद्धूर्तेमुखनमस्तेअस्तुमापतेमामाहिंसीः॥
स्रुचमाहवनीयेत्रिःकंपयति॥अपउपस्पृश्यस्रुचमासाद्यलेपमादाय॥पितृभ्यस्त्वा
पितृभिन्न॥दक्षिणतोनिमार्ष्टि॥पितृभ्यइदं॰अपउपस्पृश्य॥हविरसिहविर्मेपा
मानमृतात्सत्यमुपागामप्सुश्रद्धा॥अपउपस्पृश्य॥भक्षणार्थादंगुल्यादाय॥पूषा
सि॥भक्षयति॥आचम्यपुनस्तथैवभक्षयति॥आचम्यस्रुचंदर्वीं॰श्चादायस्रुग्गतं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

स्तआदायद्विर्नक्षयति।आग्नेयꣳरेतःप्रजननंमेअस्तुदक्षावीरꣳसर्वगणꣳस्वस्तये।आत्म
सनिप्रजासनिपशुसन्यमयसनिलोकसनिदृष्टिसनिं।।अग्निःप्रजांबकुलांमेकरोत्व
नंपयोरेतोअस्मासुधत्त।रायस्पोषमिषमूर्जमस्मासुदीधरत्स्वाहा।।सायंनक्षय
तिसकृन्मंत्रः।।सौर्यꣳरेतःप्रजननंमेअस्तुꣳदृष्टिसनिं।सूर्यःप्रजांबकुलांमेकꣳरोति
प्रातः।।अयंमंत्रःपयाइत्येव।पयोव्यतिरिक्तंद्रव्येतु।गर्भेभ्यस्त्वागर्भान्प्रीणामि।सायं
प्रातश्चनक्षयतिसकृन्मंत्रेणहिः।।द्विश्चनिर्लेढि।।अनाचांतएवस्रुचमद्भिःपूरयित्वा
नस्रालितेनहस्तेनविलोड्य।।सर्पेभ्यस्त्वासर्पाजिन्व।।भूमोदिधुक्षति।सर्पेभ्यइदंꣳहिर
वम्यं।।स्रुचंदर्भैःप्रक्षाल्याद्भिःपूरयित्वा।।सर्पान्पिपीलिकाजिन्व।सर्पेभ्यःपिपीलिकेभ्य
इदंआहवनीयस्योत्तरतउत्सिंचति।पुनःपूरयित्वा।सर्पदेवजनाजिन्व।सर्पदेवज
नेभ्यइदंꣳद्वितीयं।भूतेभ्यस्त्वा।भूतेभ्यइदंꣳतृतीयं।महतेदेवाय।महतेदेवायेदंꣳचतुर्थं।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पृथिव्याममृतंजुहोमिस्वाहा।पृथिव्यादं०पंचममंतर्वेदिसशेषं॥गृहेभ्यस्त्वागृहान्प्रीणामि।गृहेभ्यदं०शेषंपश्चाद्गार्हपत्यस्यपत्न्यंजलौ।पत्न्यसंनिधानेगार्हपत्यस्यपश्चादुमाभ्येव॥आहवनीयेहस्तंप्रताप्यस्रुच्यवदधातिस्रुचंवानिष्टप्यहस्तेवदधाति॥सप्तर्षिभ्यस्त्वासप्तभ्यःप्रजिन्व॥सप्तर्षिभ्यइदं०उदस्रुद्दिशति॥स्रुचंनिधायस्रुवेणागार्हपत्यदक्षिणाग्न्योर्जुहोति॥इंसमिधावाधाय।मयिपुष्टिंपुष्टिपतिर्दधातुरायस्पोषमिषमूर्जमस्मासुदीधरत्॥अग्नयेगृहपतयेरयिपतयेपशुपतयेपुष्टिपतयेकामायान्नाद्यायस्वाहा॥गार्हपत्येहिर्जुहोति॥अग्नयेगृहपतयेरयिपतयेपशुपतयेपुष्टिपतयेकामायान्नाद्यायेदं०॥दक्षिणाग्नेरिंसमिधावाधाय॥अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदेस्वाहा।अग्नयेअन्नपतयेदं०॥हिः।स्थालीसंसाव्यद्यावापृथिवीभ्यांत्वाद्यावापृथिवीजिन्व॥अंतर्वेदि

CC-0. Mirugendra Vinod Collection. Digitized by eGangotri

निनयति॥ द्यावापृथिवीभ्यामिदं॰ऋतंत्वेतिपूर्ववत्परिषेक॥ दीर्घहरीघासंदीर्घ
मिसिस्वाहा॥अग्नयइदं॰आहवनीयंगार्हपत्यंदक्षिणाग्निंचोपसमिधे॥पूर्ववत्परि
समूहनं॥ पविस्तरणान्युपोद्य॥यजमानः दृष्टिरसिदृष्ट्यैमेप्राणाम्रतोत्सृष्ट्यमुपा
मामुष्मुश्रद्धा॥अपउपस्पृश्य॥आहवनीयात्तृणान्युपोद्य॥अस्मिन्होममध्येमंत्रा
त्रकर्मविपर्यासार्थंअनाज्ञातादिमंत्रत्रयंजपेत्॥ अनाज्ञातंयदाज्ञातंयज्ञस्यक्रि
यतेमिथु॥अग्नेतदस्यकल्पयत्वं॰हिवेत्थयथातथं॥पुरुषसंमितोयज्ञोयज्ञः पुरु
षसंमितः॥अग्नेतदस्यकल्पयत्वं॰हिवेत्थयथातथं॥यत्काकत्रामनेसादीनदक्षि
नयज्ञस्यसन्धत्तेतत्तोसः॥अग्निरुद्गातात्रतुविद्विज्ञानन्यजिष्ठोदेवा॰ऋतुशोयज
नाति॥प्रमादात्कुर्वतामितिसाद्गुण्यायविष्णुस्मरेत्॥॥॥ इत्यग्निहोत्रहोमप्रयोगः॥
श्रीशुभमस्तु॥